## अध्याय :- २० Chapter-20

नारद उवाच ।।[१]

तं दृष्टवा दानवाः[२] सर्वे क्रुद्धाः स्वैः स्वैर्बलैर्वृताः ।
सरधा इव माक्षिकं रुरुधुः सर्वतस्ततः ।। १

पर्वताभे गजे भीमे मदस्राविणि दुर्दमे ।।
सितचित्रपताके तु प्रभिन्नकरटामुखे ।। २

स्वर्णवर्णार्चिते यद्वृन्नगे दावाग्निसंवृते ।
आरुह्याजौ निमिर्दैत्यो हरिं प्रत्युददौ बली ।। ३

तस्यार्थे दानवा रौद्रा गजस्य परिरक्षिणः ।
सप्तविंशतिकोटयश्च किरीट[३]कवचोज्ज्वलाः ।। ४

अश्वमारुह्य शैलाभं मथनो हरिमाद्रवत् ।।
पंचयोजन प्रग्रीवमुष्ट्रमास्थाय जंभकः ।। ५

शुम्भो मेषं समारुह्या व्रजद्दाशयोजनम् ।
अपरे दानवेन्द्राश्च दत्ता नानास्त्रपाणयः ।। ६

आजग्मुः समरे क्रुद्धा विष्णुमक्लिष्टकारिणम् ।
परिघेण निमिर्दैत्यो मथनो मुद्गरेण च ।। ७

---

१ ब. श्री नारद उ० ।।
२ अ. क्रुद्धाः सर्वे
३ अ. मुकुटो

शुम्भः शूलेन तीक्ष्णेन प्रासेन ग्रसनस्तथा ।
चक्रेण क्रथनः[1] क्रुद्धो जंभः शक्तया महारणे ।। ८

जघ्नुनरायण शेषां विशिखैर्मर्मभिदिभिः ।
तान्यस्त्राणि प्रयुक्तानि विविशुः पुरुषोत्तमम् ।। ९

उपदेशा गुरोर्यद्वत्सच्छिष्यं बहुधेरिताः ।
ततः क्रुद्धो हरिर्गृह्य धनुर्बाणांश्च पुष्कलान् ।। १०

ममर्द दैत्यसेनां[2] तद्धर्ममर्थवचो यथा ।
निमिं विव्याध विंशत्या बाणैरनलवर्चसैः ।। ११

मथनं दशभिश्चैव शुम्भं पंचभिरिव च ।
सतेन महिषं क्रुद्धो विव्याधोरसि माधवः ।। १२

जंभं द्वादशभिस्तीक्ष्णैः सर्वांश्चैकैकशोऽष्टभिः ।
तस्य तल्लाघवं दृष्टवा दानवाः क्रोधमूर्छिताः ।। १३

चक्रुर्गाढतरं यत्नमावृण्वाना हरिं शरैः ।
चिच्छेदाथ धनुर्ज्यां च निमिर्भल्लेन दानवाः ।। १४

---

१ महिषाः अ. ब. पाठः ।
२ अ. ब. सैन्यं

हस्ताच्चापं च संरंभाच्चिच्छेदमहिषासुरः ।
पीडयामास गरुडं जंभो बाणायुतैस्त्रिभिः ।। १५

भुजावस्य च विव्याध शुंभोबाणायुतेन वै[१] ।
ततो विस्मितचित्तस्तु गदां जग्राह माधवः ।। १६

तां प्राहिणोत्स वेगेन मथनाय महाहवे ।
तामप्राप्तां निमिर्बाणैर्मुशलाभिः सहस्त्रशः ।। १७

आहत्य पातयामास विनदन्कालमेघवत् ।
ततोऽन्तरिक्षे हाहेति भूतानां जज्ञिरे कथाः ।। १८

नैतदस्ति बलं[२] व्यर्थं यत्रासीर्यत सा गदा[३] ।
तां हरिः पतितां[४] दृष्टवा अस्थाने प्रार्थनामिव ।। १९

जग्राह मुद्गरं घोरं दिव्यरत्नपरिष्कृतम् ।
तं मुमोचातिवेगेन निमिमुद्दिश्य दानवम् ।। २०

तमायांतं वियत्येव त्रयो दैत्या ह्यवारयन् ।
गदयाजंभदैत्यस्तु ग्रसनः पट्टिशेन तु ।। २१

---

१ अ. "वैः" पाठः ।
२ अ. खिलं
३ ब. तदा
४ ब. पतितं

शक्तया च महिषाो दैत्यो विनर्दतो महास्वम् ।
निराकृतां तमालोक्य दुर्जनैः सुजनं यथा ।। २२

जग्राह शक्तिमुग्रोग्रां शतघंटामहास्वनाम्[1] ।
जंभाय तां समुद्दिश्य प्राहिणोद्भीषाणो रणे ।। २३

तामायान्तीमथालोक्य जंभोऽन्यस्य स्थात्तुवरात् ।
आप्लुत्य लीलया गृह्णन्कामिनीं कामुको यथा ।। २४

तदैव गरुडं मूर्ध्नि जघ्ने स प्रहसन्बली ।
ततो भूयो रथं प्राप्य धनुर्गृह्याभ्ययोयुत ।। २५

विचेताश्चाभवद्युद्धे गरुडः शक्तिपीडितः ।।
ततः प्रहस्य तं विष्णुः साधुसाध्विति भारत ।। २६

करस्पर्शेन[2] कृतवान्विमोहं विनतात्मजम् ।
समाश्वास्य च तं वाग्भिः शक्तिं दृष्टवा च निष्फलाम् ।। २७

कुभार्यस्य यथा पुंसः सर्वं स्याच्चिंतितं वृथा ।
[3]दृढसारमहामौर्वीमन्यां संयोजयत्ततः ।। २८

---

१ अ. महारवां ।

२ ब. स्पर्शेन

३ "दृढसार संहामौर्वी" अ. पाठः ।

कृत्वा च तलनिर्घोषं रौद्रमस्त्रंमुमो च सः ।
ततोऽस्त्रतेजसा सर्वमाकाशं नैव दृश्यते[1]।। २९

भूमिर्दिशश्च विदिशो बाणजालमया बभुः ।
दृष्टवा तदस्त्रमाहात्म्यं सेनानीर्ग्रसनोऽसुरः ।। ३०

ब्राह्मम्स्त्रं चकाराशु सर्वास्त्रविनिवारणम् ।
तेन तत्प्रशमं यातं रौद्रास्त्रं लोकभीषणम् ।। ३१

अस्त्रे प्रतिहते तस्मिन्विष्णुर्दानवसूदनः ।
काल दंडास्त्रमकरोत्सर्वलोक भयंकरम् ।। ३२

२* संधीयमानेस्त्रे तस्मिन्मारुतः परुषो ववौ ।
चकंपे च मही देवी भिन्नाश्चांबुधयोऽभवन् ।। ३३

[3]तदस्त्रमुग्रं दृष्टवा तु दानवा युद्धदुर्मदाः ।
चक्रुरस्त्राणि दिव्यानि नानारूपाणि[4] संयुगे ।। ३४

नारायणास्त्रं ग्रसनास्तु च चक्रे त्वाष्ट्रं निमिश्चास्त्र वरंमुमोच ।
ऐषीकमस्त्रं च चकार जंभो युद्धस्य दंडास्त्र निवारणाय ।। ३५

---

१ अ. ब. दृश्यत
२ * "तस्मिन्मारुतः संधीयमानेस्त्रे" । अ. प्रतौ इत्ययं पाठः ।
३ अ. तमस्त्र....
४ ब. नारुनोपाणि

यावच्च संधानवशं प्रैयांति नारायणादीनि निवारणाय ।
तावत्क्षणेनैव जघान कोटीदैत्येश्वराणां किलकालदण्ड[1] ।। ३६

अनंतरं शांतमयं तदस्त्रं दैत्यास्त्रयोगेन च कालदण्डम् ।
शांतं तदालोक्य[2] हरिः स्वमस्त्रंकोपेन कालानलतुल्य मूर्तिः ।। ३७

जग्राह चक्रं तपनायुत प्रभुग्रारमात्मानमिव द्वितीयम् ।
चिक्षेप सेनापतये ज्वलंत चतुर्भुजः संयति[3] संप्रगृह्य ।। ३८

तदापजश्चक्रमथो विलोक्य सर्वात्मना दैत्यवराः स्ववीर्यात् ।
नाशक्नुवन्वारयितुं प्रचंड दैवं यथा पूर्वमिवोपपन्नम् ।। ३९

तदप्रतर्क्य नवह्वितितुल्यं चक्रं प्रपातं ग्रसनस्य कंठे ।
तद्रक्तधारारुणघोरनाभि जगाम भूयोपि करं मुरारेः ।। ४०

चक्राहतः संयति दानवश्च पपात भूमौ प्रममार चापि ।
दैत्याश्च शेषा भृशशोकमापुः क्रोधं च केचित्पिपिषुर्भुजाश्च ।। *[4] ४१

ततो विनिहते दैत्ये ग्रसने बलनायके ।
निर्मर्यादमयुध्येत हरिणा सह दानवाः ।। ४२

---

१ अ. ब. दंडम्

२ अ. तमा

३ अ. संप्रणाव्य

४ * After the sloka No. 41 there is written in the M.S.S. 'A'

इति कुमारिका खंडे देवासुर युद्धे सेनानी ग्रसनस्य वधः ।

The sloka No. 42 begins with -

नारद उवाच ।

पट्टिशैमुशलैः पासैर्गदाभिः कणपैरपि ।
तीक्ष्णाननैश्च नाराचैश्चक्रैः शक्तिभिरेव च ।। ४३

तदस्त्रजालं तैर्मुक्तं लब्धलक्षो जनार्दनः[१] ।
एकैकं शतधा चक्रे बाणैरग्निशिखोपमैः ।। ४४

जघान तेषां संक्रुद्धः कोटिकोटिं जनार्दनः ।
ततस्ते सहसा भूत्वा न्यपतन्केशवोपरि ।। ४५

गरुडं जगृहुः केचित्पादयोः शतशो/ सुराः ।
ललंबिरे च पक्षाभ्यां मुखे चान्ये ललंबिरे ।। ४६

केशवस्यापि धनुषि भुजयोः शीर्ष एव च ।
ललंबिरे महादैत्या निनदंतो मुहुर्मुहुः ।। ४७

अथ तदद्भुतं महद्दृष्टवा सिद्धचारणवार्तिकाः ।
हाहेति मुमुचुर्नादंबरे चास्तुवन्हरिम् ।। ४८

ततो हरिर्विनिर्धूय पातयामास तान्भुवि ।
[२] यथा प्रबुद्धः पुरुषो दोषान्संसारसंभवान् ।। ४९

---

१ ब. जनार्दन
२ ब. तथा पयुद्धः

विक्रोशं च ततः कृत्वा नंदकं खड्गमुत्तमम् ।
चर्म चाप्यामलं विष्णुः पदातिस्तानधावत ।। ५०

ततो मुहूर्तमात्रेण[१] पद्भानिदश केशवः ।
चकर्त मार्गे बहुभिर्विचरन्दैत्यसत्तमान् ।। ५१

ततो निमिप्रभुतयो विनद्यासुरसत्तमाः ।
अधावंत महेष्वासाः केशवं पादचारिणम् ।। ५२

गरुत्मांश्चाभ्यात्तूर्णमारुरोह च तं हरिः[२] ।
उवाच च गरुत्मंतं तस्मिंस्तुमुलरणे ।। ५३

अश्रांतो यदि तार्क्ष्योसि मथनं प्रति तद्व्रज ।
श्रांतश्चेच्च मुहूर्तं त्वं रणादपसृतोभव ।। ५४

तार्क्ष्य उवाच ।।
न मे[३] श्रमोऽस्ति लोकेश किंचित्संस्मरतश्च मे ।
यन्मे सुतान्वाहनत्वे कल्पयामास तारक : ।। ५५

इति ब्रुवन्मणो[४] दैत्यं मथनं प्रति सोऽगमत् ।
दैत्यस्त्वभिमुखं दृष्टवा शंखचक्रगदाधरम् ।। ५६

---

१ ब. मान्हर्त मात्रेण
२ अ. हरिं
३ अ प्रतौ "मे" नास्ति ।
४ ब. ब्रुवन् रणे

जधान भिंडिपालेन शितधारेण वक्षसि ।
तं प्रहारमचिंत्यैव विष्णुस्तस्मिन्महाहवे ।। ५७

जधान पंचभिर्बाणैर्गिरींद्रस्यापि भेदकैः ।
आकर्णकृष्टैर्दशभिः पुनर्विद्धः स्तनांतरे ।। ५८

विचेतनो मुहूर्तात्स संस्तभ्य मथनः पुनः ।
गृहीत्वा परिघंमूर्ध्नि जनार्दनमताडयत् ।। ५९

विष्णुस्तेन प्रहारेण किंचिदाघूर्णितो/भवत् ।
ततः कोपविवृत्ताक्षो गदां जग्राह माधवः ।। ६०

तया संताडयामास मथनं हृदये दृढम् ।
स पपात[1] तथा भूमौ चूर्णितांगो ममार च ।। ६१

तस्मिन्निपतिते भूमौ मथने[2] मथिते भृशम् ।
अवसादं ययुर्दैत्याः[3] सर्वे ते युद्धमंडले ।। * ४ ६२

ततस्तेषु विषण्णेषु दानवेष्वतिमानिषु ।
चुकोप रक्तनयनो महिषो दानवेश्वरः ।। ६३

---

१ अ. पापात

२ ब. प्रथने

३ "कर्मएकार्किन यथा" । अ. प्रतौ इत्ययं भिन्नः पाठः ।

४ * After this, there is written in the M.S.S. 'A' -

इति कुमारिकाखंडे देवासुरयुद्धे मथनवधः ।।

The next sloka begins with -

- नारद उवाच ।।

प्रत्युद्ययौ हरिं रौद्रः स्वबाहुबलमाश्रितः ।
तीक्ष्णधारेण शूलेन महिषो हरिं[1]मर्दयन् ।। ६४

ग्रस्तुमैच्छद्रणे दैत्यः सगरुत्मंतमच्युतम् ।
अथाच्युतोपि विज्ञाय दानवस्य चिकीर्षितम् ।। ६५

शक्त्या च गरुडं वीरो त्वदये/भ्यहनद्दृढम् ।
ततो विवृत्य वदनं महाचलगुहानिभम् ।। ६६

वदनं पूरयामास दिव्यैरस्त्रैर्महाबलः ।
स तैर्बाणैरभिहतो महिषो/[2]चलसंनिभः ।। ६७

परिवर्तित कायार्धः पपाताथ ममार च ।
महिषं पतितं दृष्ट्वा जीवयित्वा पुनर्हरिः ।। ६८

महिषं प्राह मत्तस्त्वं वधं नार्हसि दानव[3] ।।
योषिद्वध्यः पुरोक्तस्त्वं साक्षात्कमलयोनिना ।। ६९

उत्तिष्ठ गच्छ मन्मुक्तो द्रुतमस्मान्महारणात् ।।
इत्युक्तो हरिणा तस्मादेशादपगतो/सुरः ।। ७०

---

१ अ. मर्दयत्
२ अ. बल
३ ब. दानवं

तस्मिन्पराङमुखे दैत्ये महिषे शुंभ[1] दानवः ।
संदष्टौष्ठ[2]पुटाटोपो भ्रुकुटी कुटिलाननः ।। ७१

निर्मथ्य पाणिना पाणिं धनुरादाय भैरवम् ।।
सज्जीकृत्य महाघोरान्मुमोच शतशः शरान् ।। ७२

स चित्रयोधी [3]दृढमुष्टिपातस्ततश्च विष्णु गरुडंचदैत्यः ।।
बाणैर्ज्वलद्वहिन्शिखानिकाशैः क्षिप्तैरसंख्यैः [4]प्रतिघातहीनैः ।। ७३

विष्णुश्च दैत्येंद्र शरार्दितो भृशं भुशुं डिमादाय कृतांततुलयाम् ।
तया मुखं चास्य पिपेष संख्ये शुंभस्य जत्रुं च धराधराभम् ।। ७४

ततस्त्रिभिः शुंभभुजं द्विषाष्टया सूतस्य शीर्षं दशभिश्चकेतुम् ।।
विष्णुर्विकृष्टैः श्रवणावसानं दैत्यस्य बाणैर्ज्वलनार्कवर्णैः ।। ७५

स तैश्च विद्धोव्यथितोबभूव दैत्यश्चवरो [5]विस्त्रुतशोणिताक्तः ।।
ततोऽस्य किंचिच्चलितस्य धैर्यादुवाच शंखाबुज शारंगपाणिः ।। ७६

योषित्सुवध्योऽस रणं विमुंच शुंभाऽशुभस्वल्पतरैरहोभिः ।।
मत्तोर्हसि त्वं न वृथैव मूढ ततोऽपयातः स च शुंभदानवः ।। ७७

---

१ ब. श्रुभ

२ ब. पुटापोटो

३ "द्रढं" अ. पुस्तके लुप्तम् ।

४ अ. पुस्तकेतुपत्रं लुप्तम् ।

५ ब. विश्रुत

जन्मोऽथ तद्विष्णुमुखान्नि शम्य जगर्जचोच्चैःकृतसिंहनादः ।।
प्रोवाच वाक्यं च सलीलमाजौ [illegible] महाट्टहासेन जगद्विकंप्य ।। ७८

१ * किमेभिस्ते जलावास दैत्यहीनै पराक्रमैः ।।
मामासादय युद्धेऽस्मिन्यदि ते पौरुषं क्वचित् ।। ७९

यत्ते पूर्वं हता दैत्या हिरण्याक्षमुखाः किल ।।
जंभस्तदाऽभवन्नैव पश्य मामद्य संस्थितम् ।। ८०

पश्य तालप्रतीकाशौ भुजावेतौ हरे मम ।।
वक्षो[2] वा वज्र[3]कठिनं मयि प्रहर तत्सुखम् ।। ८१

इत्युक्तः केशवस्तेन सृग्विणी संलिहनुष्णा ।।
मुमोचऽपरिघंघोरं गिरीणामपि दारणम् ।। ८२

ततस्तस्याप्यनुपदं कालाय समयं द्रढम् ।।
मुमोच मुद्गरं विष्णुर्द्वितीयं पर्वतं यथा ।। ८३

तदायुधद्वयं दृष्ट्वा जंभोन्यस्य रथे धनुः ।।
आप्लुत्य[4] परिघं गृह्य गरुडं तेन जघ्निवान् ।। ८४

---

१ * अ प्रतौ "जंभासुर उवाच" अत आरंभ्येते ।
२ ब. वक्ष्यौ
३ अ. कथिनं
४ ब. अलुप्य

द्वितीयं मुद्गरं चानु गृहित्वा विनदन्नणे ।।
सर्व प्राणेन[१] गोविंदं तेन मूर्ध्निर्जघान सः ।। ८५

ताभ्यां चातिप्रहाराभ्यामुभौ गरुड केशवौ ।।
मोहा[२]विष्टो विचेतस्कौ मृतकल्पा विवासताम् ।। ८६

तदद्भुतं महद्दृष्ट्वा जगर्जुर्दैत्य सत्तमाः ।।
नैतान्हर्षमिदोद्धूतानिदं सेहे जगत्तदा ।। ८७

सिंहनादैस्त लोन्नादैर्धनुर्नादैश्व बाणजैः ।।
जंभं ते हर्षयामासुर्वा सांस्यादुधुवुश्च ते ।। ८८

शंखांश्च पूरयामासुश्चिक्षिपुर्देवता[३] भृशम् ।। ८९

संज्ञामवाप्याथ महारणे हरिः सवैनतेय परिरम्य जंभम् ।।
परांगमुखः संद्रुगादप्रधृष्यात्पलायनं वेगपरश्चकार ।। ९०

४ * इति श्रीस्कांदे..... दैत्यैः सह विष्णोर्युद्ध वर्णनं नाम
विंशो ऽध्यायः ।।२० ।।

---

१ अ. प्रतौ "सर्वप्राणेन" इत्ययं पाठः नास्ति ।
२ अ. महा....
३ अ. देवतान्
४ * इति श्री स्कंद पुराणे देवासुर ७ युद्धे विष्णु पलायनं ।।
ब. इति श्री स्कंद पुराणे कुमारिका खंडे विंशोध्यायः ।।२०।।